॥श्रीगणेशायनमः॥अथ गायत्रीपुरश्चरणविधिः॥तत्र प्राणायाम्य प्राणानायम्य सुमुखश्चेत्यादि पठित्वा देशकालौ संकीर्त्य मम अमुकशर्मा यजमानस्यानुष्ठानचतुर्विंशतिलक्षगायत्रीपुरश्चरणांतर्गत अमुकसंख्यागायत्रीजपमहंकरिष्ये॥तत्रादौ भूतशुद्धिं भूतशुद्धिं प्राणप्रतिष्ठां च करिष्ये॥ तत्र आसनं॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसने विनियोगः॥ पृथ्वी त्वया धृता॥१॥ कूर्मासनाय नमः ॐ ॐ कमलासनाय नमः ॐ कूर्माय नमः ॐ आधारशक्तये नम

इत्यासनदेवतां च संपूज्य उपविशेत् ॥ अपसर्पंतु ये भूताशि
वाज्ञया इति वामपार्ष्णिपदघातेन भूमौ त्रिस्ताडयेत ॥ अपक्रा
मनुभूतानि समारभेत ॥ इति तालत्रयं दत्वा छोटिकया भिरंदि
ग्बंधं कुर्यात् ॥ ततो वामकुक्षौ पापपुरुषं विचिंतयेत् ॥ तथा
ब्रह्महत्याशिरःस्कंधं च स्वर्णस्तेयभुजद्वयं ॥ सुरापाणहृदामुक्तं
गुरुतल्पकटिद्वयं तत्संसर्गपदद्वंद्वं अंगप्रत्यंगपातकं उपपात
करोमाणं रक्तस्मश्रु विलोचनं ॥ खड्गचर्मधरं कृष्णं कुक्षौ पापं वि
चिंतयेत् ॥ इति ध्यात्वा ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णु
रुद्रा ऋषयः ऋग्यजुःसामानि छंदांसि प्राणाख्या देवता आ
अथर्वाणि छंदांसि

पुरश्चरणांग जपे विनियोगः ॥ विश्वामित्र ऋषये नमः शि
रसि गायत्री छंदसे नमः मुखे सवितृ देवतायै हृदि ॥ ॐ भूः पादाभ्यां नमः
जानुभ्यां स्वः कंठे ॥ अथ कर न्यासः ॐ तत्सवितुरंगुष्ठाभ्यां ॥ ॐ व
रेण्यं तर्जनीभ्यां ॐ भर्गो देवस्य मध्यमाभ्यां ॥ ॐ धीमहि अ
नामिकाभ्यां ॥ ॐ धियो यो नः कनिष्ठिकाभ्यां प्रचोदयात् करत
लकर पृष्ठाभ्यां ॥ अथ अक्षरंन्यासः ॥ ॐ तकारं पदांगुष्ठयोः ॥
सकारं गुल्फयोः ॐ विकारं जंघयोः ॐ तुकारं जान्वोः ॐ वकारं
ऊर्वोः ॐ रेकारं गुदे ॐ णिकारं लिंगे ॥ ॐ यकारं कट्यां ॐ भका

प्राणप्रतिष्ठासिध्यर्थं जपे विनियोगः ॐ आं ह्रीं क्रों यं
रं लं वं शं षं सं हं सः मम इह प्राणाः ॐ आं ह्रीं क्रों यं मम जीव इ
ह स्थितः ॐ आं ह्रीं क्रों यं मम सर्वेंद्रियाणि ॥ ॐ वाङ्
मनश्चक्षुश्रोत्रजिह्वाघ्राणपाणिपायूपस्थ इहेवागत्य सुखं
चिरं तिष्ठंतु स्वाहा ॥ ॐकारस्य ब्रह्मा ऋषिः ॥ गायत्री छंदः ॥
परमात्मा देवता ॥ भूर्भुवः स्वरिति विश्वामित्रजमदग्निभरद्वा
ज ऋषयः ॥ अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप् छंदांसि
गायत्र्या विश्वामित्र ऋषिः गायत्री छंदः ॥ सविता देवता गायत्री